अवधारणा AWADHARANA
[ A Peer-Reviewed, Open Access Journal ]
ISSN : 2505-080x (Print)
Volume 8, September 2024
Published by Creative Democrat Academy

# व्याकरणदर्शनशास्त्रशिक्षणे प्राच्यार्वाचीनविधिविमर्शः

**भोलानारायण रेग्मी,विद्यावारिधिः**
**सहप्राध्यापकः**
**श्रीविन्दुवासिनीसंस्कृतविद्यापीठम्, पोखरा**

*Article History : Submitted 19 April 2024; Reviewed 3 June 2024; Accepted 11 July. 2024*
*Author: Bholanarayan Regmi Email: drbholanarayanregmi@gmail.com*

**लेखसारः**

अनुसन्धानेऽस्मिन् व्याकरणदर्शनशिक्षणे प्राच्यार्वाचीनविधीनां विचाराः सन्ति । व्याक्रियन्ते व्युत्पाद्यन्ते असाधु-शब्देभ्यो विविच्य साधुशब्दाः पृथक्क्रियन्ते अनेनेति व्याकरणम्, वि आङुपसृष्टकात् करणार्थकात् कृधातोः करणे ल्युटि अनादेशे विभक्तिकार्येण सम्पन्नस्य व्याकरणशब्दस्य असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिनियमविशेषस्य प्रक्रिया-परिस्कारदर्शनान्वितस्य दर्शनपक्ष कः ?, व्याकरणङ्कथं दर्शनमितिविवदमानेऽस्य दर्शनत्वसाधनपुरस्सरं किन्तावत् शिक्षणं शिक्षा शिक्षणमुपदेशादिविषयाणां विचारङ्कृत्वा प्राचीनकाले कीदृशैराचार्यैः कया रीत्या शिक्षणे छात्रा लाभान्विता व्यवहारकुशलाश्चाभूवन्नित्युदाहरणं च दत्त्वा आर्षपरम्परायां गुरुकुल– ऋषिकुलाचार्यकुलस्थै-रन्तेवासिभिः के-के विधयः समाश्रितास्तेषां पौरस्त्यविधीनां प्रदर्शनेन पाश्चात्यपद्धतिः कीदृशी केन विधिना शिक्षणं सफलं भवतीति किन्तावद् भिन्नता नूतनत्वं वा तद्विषये विचाराः प्रस्ताविताः सन्ति । तेषु साहित्यिक दृष्ट्या ऐतिहासिकदृष्ट्या सांस्कृतिकदृष्ट्या दार्शनिकदृष्ट्या च संस्कृतभाषा समृद्धा महत्वपूर्णा च वर्तते । अनया भाषया सुविशालस्यास्य शिक्षणस्य परम्परा च दीर्घतमा वर्तते । संस्कृतस्य अक्षराणि सम्यक्तया ज्ञातुं प्रथमं संस्कृतव्याकरणशिक्षणमावश्यकम्, तद्विषये नैकविधा विचाराः सन्ति । वर्तमाने भाषाशिक्षणेन यस्य कस्यापि विषयस्य सम्यगध्यापने सुगमतयाऽवबोद्धुं नैकविधा विधयो विकसिता दरीदृश्यन्ते । पाश्चात्यजगति च तेषां प्रयोगेण स्वल्पेनैव कालेन अन्ताराष्ट्रियाङ्ग्लाद्याधुनिकभाषासु नैपुण्यमार्जयन्ति अध्येतारः । आधुनिकशिक्षणविधेः प्रवर्धनाय शिक्षकप्रशिक्षणम् शिक्षानिर्देशिकाया निर्माणम्, शिक्षणसामग्रीणां समुत्पादनं च विधीयत इति प्रशिक्षितः शिक्षकैः । निर्दिष्टपद्धत्या कृतं शिक्षणं प्रभावोत्पादकं भवति इति आधुनिकभाषाशिक्षणे अनुभूतचरमेव । परमद्यावधि नैपालकाः प्रशिक्षणादिसौविध्यवञ्चिताः परम्परागतशैल्या शिक्षणं कुर्वन्तीति तेषां कृते किमपि विचारणीयमिति धिया प्राक्तनैः, आधुनिकैश्च व्याकरणभाषादिविज्ञैः समाश्रितानां पद्धतीनां परिचयपुरस्सरं व्याकरणदर्शनशास्त्रशिक्षणे प्राच्यार्वाचीनविधिव्यवस्थायाः परिशीलनं क्रियते ।

***विशेषशब्दा*** : व्याकरणम्, दर्शनम्, शिक्षणम्, आचार्यः, विधिः, पौरस्त्यः, पाश्चात्यः ।

**विषयपरिचयः**

यद्यपि व्याकरणादिशास्त्राणां शिक्षणे विधयो व्यवस्थाश्च सन्ति बह्व्यः, तथाप्यत्र केषाञ्चन विधीनां परिचयपुरस्सरं प्राचामर्वाचीनानाञ्च मतानां प्रामुख्येन व्याख्यानं विषयाणां प्रदर्शनञ्च क्रियतेऽत्रानुसन्धाने तद्यथा –

| | | | |
|---|---|---|---|
| १. भाषाशिक्षणविधिः | २. श्रुतिभाषिकविधिः | ३. प्रत्यक्षशिक्षणविधिः | ४. वर्णनात्मकविधिः |
| ५. अनुवादविधिः | ६. निगमनविधिः | ७. आगमनविधिः | ८. रूपविधिः |
| ९.लेखाभ्यासविधिः | १०. प्रश्नोत्तरविधिः | ११. रूपान्तरणविधिः | १२. त्रुटिपरिमार्जनविधिः |
| १३.प्रक्रियासंसाधनविधिः | १४. व्याख्यानात्मकविधिः | १५. सिद्धान्तस्थापनविधिः | १६. ऊहविधिः |
| १७. स्वाध्यायविधिः | १८. प्रवचनविधिः | १९. पाठाभ्यासविधिः | २०. अन्वेषणविधिः |

उक्तेषु विधिषु केचन विधयः पौरस्त्याः, केचन पाश्चात्याः सन्ति । एतान् विधीन् अङ्गीकृत्य व्याकरणशास्त्र– प्रसिद्धेषु प्रक्रियापरिष्कारदर्शनपक्षेषु दर्शनपक्षाध्यापने पक्षान्तरशास्त्रशिक्षणे वा भाषाशिक्षण– श्रुतिभाषिक– प्रत्यक्षशिक्षण– वर्णन– निगमन– आगमन– लेखाभ्यास– प्रश्नोत्तर– त्रुटिमार्जन– व्याख्यान– ऊह– स्वाध्याय प्रवचन– पाठाभ्यास– सिद्धान्तस्थानविधय उपयुक्ताः सन्ति । तथापि प्राचीना पद्धति या खलु वैदिककाले प्रसिद्धा सा वैज्ञानिकी वर्तते । वैदिककाले विशेषेण ऋषयः शिक्षाप्रदात्तारः गुरव आसन् । शिक्षणस्य समग्रा एव व्यवस्था गुरुषु सन्निहिता आसीत् । तदानीं विद्यादानमेव सर्वथा महत्तमं दानं मन्यते स्म । अत एव गुरूणां स्थानमपि समाजे महनीयमासीत् । गुरूच्चारणानन्तरसमुच्चारणपुरस्सरं कण्ठस्थीकरणं तदानीं मुख्यशिक्षणविधि रासीत् । अत एव वेदस्य नाम श्रुतिः सञ्जातं विद्यते । तस्मिन् समये मूलतः ऋषिकुल, देवकुल – मातृकुल– पितृकुल– आचार्यकुल– गुरूकुलशिक्षाया व्यवस्थाः प्रचलिता आसन् , परमिदानीं तदतिरिक्ता व्यवस्था जरीजागर्ति अध्ययनेऽस्मिन् अध्येत्रा प्राच्यपद्धतिं सम्यग् विचार्य अर्वाचीनं पद्धत्या सह तोलनपर्यालोचनात्मकेन लाभाऽलाभयोर्विमर्शः प्रस्तुतः ।

**समस्याकथनम्**

अध्ययनेऽस्मिन् पौरस्त्यपरम्परायां सर्वशास्त्रमुखभूतस्य व्याकरणादिमुख्यशास्त्रस्य अध्यापने ये विधयो याश्च पद्धतयोऽङ्गीकृताः ताः कथङ्कारा वर्तन्त इति एका समस्या वर्तते । प्रारब्धापरिसमाप्तिभिन्ना भूतपूर्वा आधुनिकाः, ततोऽप्यवरा वर्तमाना अत्याधुनिका ये जना एतैरङ्गीकृत्य पाश्चात्यपरपम्परायां प्रयुक्ता विधयः कीदृशा ज्ञानगौरवाधायका आहोस्वित् घटाटोपमात्रका अपरा समस्या वर्तते ।

**उद्देश्यकथनम्**

व्याकरणदर्शनादिशास्त्रशिक्षणे प्राच्याधुनिकयोर्विधिषु कतमःपक्षो ज्यायान् तदन्वेषणे व्याकरणदर्शनस्यान्वेषणपूर्वकमस्याध्ययनस्योद्देश्यम् ।

**पूर्वकार्यस्य समीक्षा**

यद्यपि प्राच्यशिक्षापद्धतिमाश्रित्य बहुभिः पूर्वाचार्यैर्वहव आलेखा लिखिता सन्ति "गुरूकुल सन्देश" (२०७६, अङ्क ७) । पत्रिकायां विद्यानाथ कोइराला-गुरुप्रसादसुवेदी-वासुदेवकृष्णशास्त्रि-अर्जुनपाण्डेयप्रभृतिभिः पौरस्त्यशिक्षणपद्धतिपक्षमाश्रित्य प्रसंशापरकमध्ययनं विहितम् । आधुनिकैरत्याधुनिकैश्च भाषावैज्ञानिकैराधुनिको विधिर्मुक्तकण्ठेन प्रशंसितः सुप्रयुक्तश्च, परन्तु प्राच्यविधिपद्धतौ का वाचो युक्तिराधुनिकशिक्षणविधिपरम्परायां

कियान् लाभो वा हानिरेव उभयोर्विध्यध्यनेन सन्तोलनं न विहितम् । तस्याध्ययनस्य नितान्तमावश्यकं हृदि निधाय अस्मिन् कार्ये सम्प्रवृत्तः ।

वस्तुतस्तु विचारणायां कृतायां आधुनिकशिक्षणविधिव्यवस्था नाममात्रं कार्यकाले तु "अधीतिबोधाचरणप्रचारणम्" पौरस्त्यैर्निर्मितं सोपानचतुष्टयमेवाश्रयणे प्रशिक्षणसाफल्यं दरीदृश्यते । अनेनाध्ययनेनावश्य–मेवाधुनिकशिक्षणविधौ आङ्ग्लाद्याधुनिकानां भाषाणां यत्किञ्चत्साफल्येऽपि संस्कृतभाषासंबद्धव्याकरणादिशास्त्रशिक्षणे आर्षपद्धतिरेवाश्रयणीया । श्रुतिसिद्धाः गुरुकुलऋषिकुलमातृकुलपितृकुल – भ्रातृकुल–सतीर्थ्याग्रजकुलादयः समाश्रिताः काश्चन एव पद्धतय अस्मिन्नालेखे समुदाहृताः सन्ति । प्राचीन–नव्याधुनिकानां च मतमन्थनं विधाय प्राच्यार्वाचीनानां लाभालाभयोर्जयाजययोश्च विषये अध्येतुमध्येतुः प्रयत्नो वरीवर्ति ।

**अध्ययनविधिः**

व्याकरणदर्शनादिशास्त्रशिक्षणे प्राच्याधुनिकविधिविमर्शे विषये केन्द्रितेऽस्मिन् अध्ययने शोधतथ्यसामग्रीणां सङ्कलने पुस्तकालयीयविधिरवलम्बितो वर्तते । व्याकरणस्य दर्शनत्वसाधनपरकाः ग्रन्था युक्तिसिद्धाश्च तर्काः प्राथमिकस्रोतरूपेण गृहीता : । वैदिककाले पौराणिककाले ऐतिह्यकाले, आधुनिककाले अत्याधुनिककाले च प्रयुक्तानां पद्धतीनां समाश्रितपरका विषयसम्बद्धाः ग्रन्थाः, पत्रपत्रिकादयश्च द्वितीयस्रोतांसि । अन्वेषणेन विषयोपस्थापने निगमनात्मकविधिमनुसृत्य समागमनात्मकमुख्यविषयस्याध्ययनं विहितमस्ति चेत् सन्दर्भविषयाणां गृहीतसामग्रीणाञ्च स्थापयितुमाधुनिकभाषाभाषितैरपि एपिए पदवाच्यपद्धतिराश्रिता विद्यते ।

**विषयारम्भः**

जगत्यस्मिन् अनादिकालादेव तत्वान्वेषणार्थं विचाराः प्रचलन्तः सन्ति । आर्षपरम्परायामनेके ऋषय आसन् । तेषां विचारा अपि भिन्ना भिन्ना यत्र कुत्र समानाश्च दृश्यन्ते । मनुष्यस्य सामाजिकत्वात् स्वकीयां भावनां समाजे परिवेषणार्थं परेषां प्राप्त्यर्थञ्च कश्चन उपाय अपेक्षितः स उपाय भाषा वर्तते । भाषा सञ्चारसाधनमस्ति । विचारविनिमयस्य सरलोपायश्चेयमेव । अथवा आत्मनि स्थितस्य अध्वन्यात्मकस्य विचारस्य ध्वन्यात्मकेन रूपेण ओष्ठात् निस्सरणमेव भाषा वर्तते । पाणिनीय व्याकरणस्य भाष्धातोः सिद्धस्य भाषाशब्दस्य वदनम् कथनमित्याद्यर्था भवन्ति । विश्वस्मिन् प्रचलितानां भाषाणां स्वीयं व्याकरणं भवति। येन भाषायाः सम्यक् व्यवस्थापनेन शुद्धाऽशुद्धिनियमान् निदर्शयति । व्याकरणं विना भाषायाः सुव्यवस्था न सम्भवति । संस्कृतभाषाया व्याकरणञ्च लक्ष्यलक्षणरूपात्मकं पाणिनीयव्याकरणमेव त्रिमुनिव्याकरणनाम्ना च प्रथितं वर्तते । सर्वेषां व्याकरणशास्त्राणां सुव्यवस्थापकं साङ्गोपाङ्गप्रशस्तिपरकञ्चेदमेव । व्याकरणेऽस्मिन् प्राचीना अर्वाचीना च धाराद्वयी विद्यते अस्याध्ययनाध्यापने द्वौ क्रमौ प्रसिद्धौ एक आरोहक्रमः, अपरः अवरोहक्रमः

क्रमौ तौ द्वौ समाख्यातौ आरोहश्चावरोहकौ ।

आरोहः सूत्रसम्बद्धः प्रक्रिया चावरोहकः ।। (बी.जी. भाग्यलक्ष्मीः, सन् २०२२, पृ. ८२)

एवमेव व्याकरणशास्त्रे प्रक्रियाऽनन्तरं साङ्गं व्याकरणमवज्ञातुं बोद्धॄणां सौकर्यातिशयाय स्थले स्थले न्यायशास्त्रमाधृत्य सूत्र – वार्तिकभाष्याणाञ्च स्पष्टप्रतिपत्तिपरकः परिष्कारपक्षो द्वितीयः । सर्वेषामपि शास्त्राणां हितानुशासने वा मोक्षे वा उभयत्र प्रवर्तकत्वात् तदर्थमितरेच्छानधीनेच्छाविषयस्य परमसुखरूपमोक्षसाधनस्य परिचिन्तनस्य प्रत्यक्षदर्शनस्याव्याहतत्वमतो दर्शनपक्षस्तृतीयः । अनुसन्धाने पक्षत्रयात्मकस्य सर्वशास्त्रमुखस्य त्रिमुनिव्याकरणस्य हितानुशासनचिन्तनशास्त्रसार्थकस्य शब्दब्रह्मचिन्तनं तन्निर्वाणप्राप्तिः कथं भवतीति धिया

व्याकरणदर्शनं किं ? तस्य शिक्षणं कथं ? तन्मुखशास्त्राणां शिक्षणविधयः के ? प्राच्यविधयो ज्यायांस आहो स्वित् अर्वाच्या वा तच्चिन्तनमेवास्य आलेखस्य प्रमुखो विषयः ।

**व्याकरणशास्त्रस्य दर्शनत्वसाधनम्**

ज्ञानस्यादिस्रोतसः वेदस्य "व्याकरणनिरूक्तज्योतिष शिक्षाकल्पछन्दांसि" षडङ्गानि तेषु प्रधानं व्याकरणं प्रधाने च कृतो यत्नः फलवान् भवति । तेन विना अन्यानि अङ्गानि निष्क्रियाणि भवन्ति यथा –शरीरस्य अवयवभूतानि अन्यान्यङ्गनि मुखेन दीयमानैरन्नरसौषधादिभिरारोग्याणि पुष्टानि च भवन्ति, तथैव अनिवार्यव्याकरणाध्ययनेनैव अन्यानि वेदस्य पञ्चाङ्गानि सार्थकानि सफलानि च भवन्ति । अतो व्याकरणस्य महत्वं सर्वोपरि अस्तीत्यत्र न कस्यापि विमतिः । परन्तु अत्र दार्शनिकपक्षः कः? कथं सिद्धयतीति ? प्रश्ने पूर्वं दर्शनशब्दस्य विमर्शः क्रियते "दृश्यते वस्तुतत्वं प्रत्यक्षीक्रियते नाऽनुमीयते नोपमीयते न शब्दजन्यविषयीक्रियते येन तद्दर्शनम् । " यैर्यैरूपायै र्वस्तुतत्वस्य प्रत्यक्षं भवति ते ते सर्वेऽपि उपायाः दर्शनपदभाजो भवन्ति । विचारप्रधानभूतस्य तस्य च धाराद्वयी प्रसिद्धा एका पूर्वीया अपरा पाश्चात्या पूर्वीयधारायामपि आस्तिकनास्तिकभेदेन विभेदो दृश्यते । "अस्तीत्यदृष्टे मतिर्यस्यासौ आस्तिकः" नास्तीत्यदृष्टे मतिर्यस्यासौ नास्तिकः । अपरञ्च – वेदप्रमाणाभ्युपगन्तृत्वमास्तिकत्वम्। वेदप्रमाणाऽनभ्युपगन्तृत्वं नास्तिकत्वम् "आस्तिको वेदपोषकः" "नास्तिको वेदनिन्दकः" षण्ण्यायवैशेषिकसांख्ययो गपूर्वमीमांसोत्तरमीमांसा आस्तिकाः । जैनचार्वाकबौद्धाश्च नास्तिकाः, मूलतो नास्तिकानां भेदत्रयेऽपि भगवतो बुद्धस्य चतुर्ण्णां शिष्याणां मतभेदेन सिद्धान्तभेदात् भेदचतुष्टयं सम्पद्यते । सौत्रान्तिकवैभाषिकयोगाचारमाध्यमिकानां क्रमशो बाह्यार्थप्रत्यक्षवादः, बाह्यार्थानुमेयवादः, विज्ञानवादः, शून्यवादश्च प्रसिद्धाः । एवञ्च द्वादश दर्शनानि प्रथन्ते । परमत्राकूतम् यद् एतेषु एव दर्शनशब्दो शक्तिसम्बन्धेन वर्तते नाऽन्यत्र इति वक्तुं नैव प्रभवामः । तथा सति रजनीशदर्शनम् गन्धीदर्शनम् आधुनिकविचारपरके प्रयुज्यमनः (व्यवहृयमाणः) यो हि दर्शनशब्दः सोऽनुपपन्नः स्यात् परमिदामीं तस्य तत्र तत्र प्रयोगो दश्यते, अतः पूर्वयोगेन न केवलं द्वादशमात्रे रूढः, योगरूढो वा, अपि तु पाठकः, पाचकादिशब्दवत् यौगिकः । पाश्चात्यसिद्धान्तानुसारं दृष्टिरेव दर्शनमिति भावसाधने तु फलपरम् बोध्यम् । साध्य साधानभूतस्य दर्शनस्य विचारमाध्यमेनात्मानुभवपर्यन्तमैहिकाभ्युदय निःश्रेयसः साधने न विरोधः । व्याकरणमपि इहामुत्रफलदं वस्तुतत्वस्य साक्षात्कारकं हितानुशासनरूपं शास्त्रमस्ति । यथा वेदान्तादिशास्त्राणां लौकिकानन्दाऽनादृत्य परमानन्दरूपो मोक्षः प्रयोजनम् । तथैव सम्पूर्णव्याकरणशास्त्रस्यालोडनेन १ परमपर मप्रयोजनम्मोक्षः, २ परमप्रयोजनं शब्दानां साधुत्वासाधुत्वबोधनम् ३ मुख्यं प्रयोजनम् – रक्षोहागमलध्वसन्देहाः ४ गौण प्रयोजनानि – तेऽसुराः , दुष्टः शब्दः इत्यादीनि त्रयोदश । तथापि व्याकरणस्य दर्शनत्वे किं मानमिति पुनरपि जिज्ञास्यते कैश्चित् । वैयाकरणैस्तु केवलं शब्दसाधुत्वमेव प्रतिपाद्यते न किमपि तत्वं प्रत्यक्षीक्रियतेऽने नेति नेदं दर्शनपदभाक् चेच्छृणु यथाकश्चित् सत्सम्प्रदायः प्रपुष्टमाधिकारिकञ्च दार्शनिकपक्षमन्तरा चिराय प्रतिष्ठातुं नं प्रभवति तथैव दर्शनपक्षविधुराणि व्याकरणादिशास्त्राण्यपि नोपयान्ति चिरप्रतिष्ठां लोकपूज्यताञ्च । अस्मिन् व्याकरणशास्त्रे तु वैदिकादेव कालादारभ्य शब्दतत्त्वस्य दार्शनिको राद्धान्तो विवेच्यमानोऽवाप्यते यथा –

चत्वारि श्रृङ्गास्त्रयोऽस्यपादा द्वे शीर्षे सप्त हस्तासोऽस्य ।
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यॉं ३ आविवेश ।।
चत्वारि वाक्यरिमिता पदानि तानि विदुर्बाह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ।।

उतत्व पश्यन्न ददर्श वाचमुतत्त्वश्रृण्वन्न श्रृणोत्येनाम् ।

उतत्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासा : ॥ (पतञ्जलिः, सन् १९८७, पृ. ४०-४४)

इत्यादिभिर्वचोभिर्विश्वविश्रुतायां गुरूच्चारणानुच्चारणरूपायां श्रुतिविद्यायां सर्वविद्याया मूलाधारभूमौ ऋग्वेदे बाढं निरूपितम् ।

पुनश्च –

द्वे ब्रह्मणि वेदितव्ये शब्दब्रह्म परञ्च तत् ।

शब्द ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ (रेग्मी, २०६२, पृ. ४६)

इत्यादिप्रमाणैः केचन परब्रह्मशब्दब्रह्मातिरिक्तिं नास्तीति वदन्ति । तेषां शब्दसत्तातिरिक्त परसत्ताकत्वाभावरूपं शब्दाद्वैतं सिद्धन्तः । तत्प्राप्त्युपायश्च-

तस्माद्यः शब्दसंस्कारः सा सिद्धिपरमात्मनः ।

तस्य प्रवृत्तितत्वज्ञस्तद्ब्रह्मामृतमश्नुते ॥

अपि च –

प्राणवृत्तिमतिकान्तं वाचस्तत्वे व्यवस्थितः ।

कमसंहारयोगेन संहृत्यात्मानमात्मनि ॥ (रेग्मी, २०६२,पृ. ४७)

वाचः संस्कारमादाय वाचं ज्ञाने निवेश्य च ।

विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम् ॥ (तत्रैव)

ज्योतिरान्तरमासाद्य छिन्नग्रन्थि : परिग्रहः ।

परेण ज्योतिषैकत्वं छित्वा ग्रन्थीन् प्रपद्यते ॥ (तत्रैव)

एवम्विधा ये खलु शब्दब्रह्मातिरिक्तं भिन्नं परं ब्रह्म मन्यन्ते तैरपि व्याकरणे दर्शनत्वमकामेनापि स्वीकर्तव्यमेव । सर्वथाघहरं परं शब्दब्रह्म समाश्रित्य परं ब्रह्म समधिगच्छेत् ।

यद्यपि व्याकरणशास्त्रे प्रतिपादनभेदेन पक्षभेदा अनुमन्यते पूर्वाचार्यैः: १ प्रक्रिया २ परिष्कारः ३ दर्शनश्च । केचन प्रक्रियायामेव परिष्कारञ्चाहत्य पक्षद्वयमेव वाञ्छन्ति । व्याकरणस्य शुद्धदर्शनपक्षधरा बहवो ग्रन्थाः सन्ति यथा – पातञ्जलमहाभाष्यम्, पस्पशाह्निकम्, मञ्जूषात्रयी परमलघुमञ्जूषा, सिद्धान्तमञ्जूषा, वैयाकरणसिद्धान्तलघुमञ्जूषा, भूषणद्वयम् , वाक्यपदीयं काण्डत्रयमित्यादयः। अतो व्याकरणशास्त्रस्य दर्शनत्वे नास्तिशङ्कापङ्कलङ्काऽवसरः ।

**प्राच्यशास्त्रशिक्षणव्यवस्थाविचारः**

आर्यसभ्यतायाः संस्कृतेश्च मूलं वेदवाङ्मयम् वर्तते । वेदाश्चत्वारा : । ऋग्यजुस्सामाथर्वकाः । वैदिकादेव कालात् शिक्षणव्यवस्था आसीत् ।

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।

स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥ ( मनुः, सन् २००३, पृ.१९)

आर्यावर्तगतैकदेशे जातस्य प्रत्येकस्य मानवस्य सच्चरित्रेण इतरदेशीया सर्वे जनाः सच्चरित्रवन्तो

भवन्ति । देवपितृऋषिप्रभृतिभिः ऋणैः सह जाताः जनाः ऋष्यृणात् मुक्त्यर्थं प्राचीनकालादेव शिक्षणे प्रवृत्ता आसन् वेदकाले शिक्षणस्याभ्यासः, आध्यात्मिकविचारः तथा नैतिकमूल्यानि आधृत्य जीवनस्य समग्रविषयेषु भवति स्म । व्यक्तेर्मनो नश्वरजगतो विमुखीकृत्य शाश्वतसत्ये स्थापयितुं सहाय्यं करोति । शिक्षणम् पौरस्त्य –शिक्षा प्राचीनकाले शिक्षणाय अत्यन्तं महत्वं गच्छन्ति स्म । अस्मदीयाः प्राच्यर्षयः शिक्षणं जीवनस्य अनिवार्यमङ्गमिति अवदन् । शिक्षणात् मनुष्यस्य जीवनं परिष्कृतं समुन्नतं सुखदं च भवति । यः शिक्षणं प्राप्नोति स आत्मनिर्भरो भवति । तथैव परिवारस्य समाजस्य च निर्माणे शिक्षणस्य योगदानं बहु वर्तते । शिक्षाया उद्देश्यामपि उत्तमम् आसीत् । शिक्षा तु अधिशीलम् अधिचितम्, अधिप्रज्ञा इति चतुर्विंशतिवर्षाणामासीत् । वैदिककालीनसंस्कृतशिक्षणं वर्णाश्रमव्यवस्थानुसारं प्रचलितम् आसीत् । अतः सर्वे जना। ब्रह्मचर्याश्रमे स्थित्वा अध्ययनं कुर्वन्ति स्म ।

ब्राह्मणाः ऋक्– यजु – सामाथर्ववेदानाम् , क्षत्रियाः धनुर्वेदस्य, वैश्या वाणिज्यशास्त्रस्य, शूद्राः सामाजिकशास्त्रस्य च अध्ययनं कुर्वन्ति स्म । वैदिककाले विशेषेण ऋषयः शिक्षाप्रदातारः गुरवः आसन् । शिक्षणस्य समग्रा एव व्यवस्था गुरुषु सन्निहिता आसीत् । अत एव गुरोर्वश आसीत् । तदानीं विद्यादानमेव सर्वदानेषु महत्तमं दानं मन्यते स्म । अत एव गुरूणां स्थानमपि समाजे महनीयम् आसीत् । श्रवणानन्तरं कण्ठस्थीकरणम् एव तात्कालिकी मुख्या शिक्षणप्रक्रिया आसीत् । अत एव वेदस्य नामापि श्रुतिः सञ्जातं विद्यते । तस्मिन् समये मूलतः ऋषिकुल– देवकुल–पितृकुल–राजकुल–गुरुकुल-शिक्षापद्धतयः प्रचलिताः आसन् ।

क) ऋषिकुलशिक्षापद्धतिः – अस्यां पद्धतौ ऋषेराश्रमे एव शिक्षणम् भवति स्म । ऋषयः शिक्षाप्रदातारः भवन्ति स्म । ऋषेराज्ञानुसारं विद्यार्थिनः अध्ययनं कुर्वन्ति स्म । अस्यां पद्धतौ विशेषतः वेदस्य ज्ञानपक्षस्य विवेचनं भवति स्म ।

ख) देवकुलशिक्षापद्धतिः – अस्यां पद्धतौ कर्मकाण्डदेवपूजनसम्बद्धानां कर्मकाण्डादिविषयाणां शिक्षणम् भवति स्म । विशेषतः वेदस्य कर्मपक्षस्य विवेचनं भवति स्म । अत एव कर्मकाण्डसम्बद्धानां ब्राह्मणग्रन्थानाम् अध्ययनं मूलरूपेण भवति स्म ।

ग) पितृकुल– शिक्षापद्धतिः– अस्यां पद्धतौ मानववंशस्य विषये शिक्षणम् भवति स्म ।

घ) राजकुलशिक्षापद्धतिः– राजकुमाराणां कृते राजनीतेः, धनुर्वेदस्य शिक्षणम् अस्यां पद्धतौ भवति स्म ।

ङ) गुरुकुलशिक्षापद्धतिः – महत्त्वपूर्णा शिक्षापद्धतिः, अस्यां पद्धतौ मानवजीवनस्य कृते आवश्यकीनां सैद्धान्तिकानां व्यावहारिकाणाञ्च विषयाणां शिक्षणं क्रियते स्म । गुरूणामाश्रमा एव विद्यालयाः, आश्रमस्य परिसरा एव कक्षाप्रकोष्ठाः, छात्राः गुरूणामाश्रमे परिवारसदस्यरूपेण निवसन्ति स्म । गुरवश्च छात्रान् पुत्रवत् स्नेहं कुर्वन्ति स्म । शिक्षा च निःशुल्का आसीत् । गुरुशुश्रूषा एव छात्राणां परमं पारिश्रमिकमासीत् । अध्ययनस्य माध्यमभाषा संस्कृतभाषा आसीत् । अतः वैदिककालस्य मुख्या शिक्षणपद्धतिः गुरुकुलशिक्षापद्धतिः, आसीत् ।

पौराणिककालेऽपि गुरुकुलशिक्षापद्धत्यनुसारं संस्कृतस्य शिक्षणम् अभवत् । बुद्धस्य समये व्यवहारे यद्यपि प्राकृतभाषायाः प्रयोगः आसीत्, परन्तु शिक्षणं संस्कृतभाषायामेव भवति स्म । राज्ञः विक्रमादित्यस्य समयेऽपि संस्कृतस्य प्रचारः प्रचुर आसीत् । अतः शिक्षणमपि संस्कृतस्य एव मुख्यतया भवति स्म । लिच्छवीकाले च संस्कृतस्य शिक्षणं गुरुकुलपद्धत्यनुसारमभवत् । नेपाले १९१० (दशोत्तरैकोनविंशतितमशताब्याम्), आङ्गलशिक्षायाः औपचारिक-शिक्षणस्य विद्यालयपद्धतेः प्रारम्भः सञ्जातः । तस्मादेव कालात् विद्यालयीयपद्धत्यनुसारं

संस्कृतशिक्षणस्य प्रारम्भः सञ्जातः ।

तात्कालिकस्य प्रधानमन्त्रिणो जङ्गबहादुरस्य समये नारायणहिटीराजप्रासादे संस्कृतपाठशालायाः स्थापना विहिता । यस्मात् विद्यालयात् नेपाले संस्कृतशिक्षणे विद्यालयपद्धतिः समागता दृश्यते । तदनन्तरं वि.सं १९३२ द्वात्रिंशदुत्तरैकोनविंशतिशताब्द्यां बालब्रह्मचारिणा षडानन्देन भोजपुरे दिङ्लानामके स्थाने षडानन्दसंस्कृतपाठशालायाः स्थापना विहिता । अधुना एष एव विद्यालय आधिकारिकरूपेण प्रथमो विद्यालयो मन्यते ।

ततः १९३४ (चतुस्त्रिंशदुत्तरैकोनविंशतिशताब्द्याम्) राजराजेश्वरीघाटस्थाने धीरशमशेरेण संस्कृतपाठ–शालायाः स्थापना विहिता । अस्यैव विद्यालयस्य नाम राजकीयसंस्कृतपाठशाला सञ्जाता । पुनः राजकीयप्रधानपाठशाला च अधुना सं . मा. वि. रानीपोखरी वर्तते । अस्याः सम्बन्धो वाराणसीस्थेन गभरमेन्टकलेजनाम्ना महाविद्यालयेन सह आसीत् । अस्यां पाठशालायां काव्यज्योतिषवेदकर्मकाण्डन्यायादीनाम् अध्ययनं भवति स्म । कण्ठस्थीकरणमेव प्रमुखः शिक्षणविधिः, शिक्षा च निःशुल्का, प्रधानमन्त्रिणा वीरशमशेरेण गोत्रहत्याया पापविमोचनार्थं (१९४२) द्विचत्वारिंशदुत्तरैकोनविंशतितमशताब्द्याम् छात्रावासस्य स्थापनापि विहिता । तदनु अन्ये विद्यालयाश्च संस्थापिताः ते यथा –

वि.सं १९६६ ज्ञानकूपसंस्कृतपाठशाला ( जनकपुर)

वि.सं १९६६ रिडीसंस्कृतपाठशाला (रिडी)

वि.सं १९७२ मटिहानीसंस्कृतपाठशाला (जनकपुर)

वि.सं १९७२ वैदिकविद्यालयः ( स्वर्गद्वारी प्युठान)

संस्कृतस्य अध्यनाय अधुना बहूनि गुरुकुलानि औपचारिकशिक्षां प्रददन्ति सन्ति । उच्च शिक्षाप्रदानाय नेपालसंस्कृतविश्वविद्यालयश्चास्ति । इत्थं वैदिककालाद् आरभ्य अधुना यावत् संस्कृतस्य शिक्षणं प्रचलद्विद्यते ।

**प्राच्यशिक्षणपद्धतय :**

पूर्वं गुरुकुलानि शिक्षणकेन्द्राणि आसन् तत्रस्था आचार्या एव बोधयन्ति स्म । त एव आचार्याः सर्वोपरि आसन् । तपः स्वाध्यायः प्रवचनञ्च पाठनाधिगम इमानि सामान्यतन्त्राणि अधिगमे आसन् ।

सम्यक्तया ज्ञानार्थं प्रथमं श्रवणं तदनन्तरं मननं ततो निदिध्यासनमिति त्रीणि सोपानानि भवन्ति स्म । द्वादशवर्षाणि यावत् गुरुसेवया अध्ययनं भवति स्म । गुरुकुलशिक्षणे चरित्रनिर्माणं व्यक्तित्वनिर्माणं च भवति स्म । गुरुकुलानि प्रायः नदीतीरेषु गिरिगह्वरेषु च विद्यन्ते स्म । अतस्तत्र उत्तमे वातावरणे बोध– प्राकृतिकप्रयोगालयः, उत्तमज्ञानभण्डारः प्राप्यते स्म । अध्येतारो गुरोर्नैकट्यं सम्प्राप्य ज्ञानं सम्पादयन्ति स्म । परस्परः सहवासः, अनिवार्यमासीत् तदानीन्तनशिक्षणकाले ।

विद्या द्विधा भवति । परा अपरा च । (मुण्डकोपनिषदि, सन् १९९१, १– ४– ५) आङ्गीरसः शौनकं द्वे विद्ये वेदितव्ये इति ह स्म ब्रह्मविदो वदन्ति परा चैवापरा । तत्र अपरा ऋग्वेदो यजुर्वेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते । अक्षरब्रह्मणः प्रतिपादनं करोति परा विद्या । परया विद्यया ऐहिकपारलौकिकञ्चफलमश्नुते – सा विद्या या विमुक्तये । इत्यदिना ।

अपरा तु जीविका विद्या कथ्यते । पूर्वं जीविका विद्याः आसन् इति । (छान्दोग्योपनिषदि, सन् १९९१, ७, २, १) उदाहरणं दृश्यते यो देवर्षिर्नारदः सनत्कुमारमुपेत्य स्वाधीतानां विद्यानां विषये विवृणोति ।

यथा ऋग्वेदं भगवोयेमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराण पञ्चमंवेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतत् भगवोऽध्येमि इति । एवम् जिविकाविद्याया अपि प्रामुख्यता आसीत् इति ज्ञायते । उपनिषत्काले शिक्षणस्य पूर्णपरिचयं प्राप्नुमः। तत्र गुरुशिष्यौ अध्ययनात् प्राक् भगवन्तं प्रार्थयते स्म । तत् कठोपनिषदि एवमस्ति –

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

तेजस्विनावधीतमस्तु मा विद्विषावहै ॥ (कठोपनिषदि, सन्, १९९१, पृ. ४)

शिक्षणे तपः, ब्रह्मचर्यं, श्रद्धा च आसीत् । शिष्यः स्वयमन्वेषक आसीत् गुरोर्मार्गदर्शनेन । तथा गुरवः शिष्यान् व्यकसयन् प्राबोधयन् च । तदा शिक्षायां निर्भीति दृश्यते स्म । ज्ञानार्थं श्रवणं मननं निदिध्यासनम् इति च त्रयम् । शिष्यः स्वस्य कृते अपि च गुरोः कृते यशः प्रार्थयते स्म । (तैत्तिरयोपनिषदि, सन् १९९१, १, ३) सह नौ यशः । सहनौ ब्रह्मवर्चसम् इति शिष्यः प्रार्थयते । एवम् गुरुशिष्ययोः सम्बन्ध उत्तम आसीत् । उपनिषद अवलोकयामश्चेत् काचित् शिक्षापरम्परा आसीत् इति ज्ञायते । विद्या कथम् अधिगता भवति अथवा ज्ञानप्रदानाय शिक्षाव्यवस्था कथं स्यात् इति तैत्तिरीयोपनिषदि शिक्षावल्ल्यामेव पञ्चमहासंहितासु अन्यतमायां संहितायां दर्शिता अस्ति । अथाधिविद्यम् । आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनं सन्धानम् । इत्यधिविद्यम् । (तत्रैव १.३) अत विद्यायाः प्राप्तिविषये उच्यते– आचार्यः पूर्वरूपम्, अन्तेवास्युत्तर रूपम् । विद्या संधिः प्रवचनं सन्धानम् । इत्यधिविद्यम् । इत्युक्तेः स ज्ञानी । शिष्य उत्तररूपं नाम आचार्यात् विद्या एतमागच्छेत् । यथा जलं उपरिष्टात् अधः प्रवहति तथा । एतयोर्मध्ये अस्ति विद्या इति सन्धिः । प्रवचनम् अथवा उपदेश एव सन्धानम् । यो जिज्ञासुः गुरुम् अन्विष्य गच्छति । गुरुः तस्मै स्वज्ञानधारां प्रददाति इति । पूर्वं गुरुकुलेषु उत्तमशिक्षणमासीत् इति कारणातः, तत्र सरलजीवनम्, उच्चचिन्तनम् इति द्रष्टुं शक्यते स्म । तदा शिक्षणपद्धतौ चत्वारि सोपानानि आसन् ।

१. अधीतिः (अध्ययनं ज्ञानम गुरुमुखात्)

२. बोधः (अर्थावगतिः, विशेषज्ञानं सामर्थ्यं च )

३. आचरणम् (तदर्थानुष्ठानं व्यवहारे अवतरणम्)

४ प्रचारणम् (अध्यापनं शिक्षादानं च शिष्यप्रशिष्यतच्छिष्येभ्यः तस्य प्रचारः प्रसारश्च)

प्रवचनम् पूर्वम् आचार्यः प्रवचनमाध्यमेनैव बोधयति स्म । प्रवचने शिक्षणपद्धतयः, शिक्षणव्यूहाः, शिक्षणयुक्तयः, शिक्षासूत्राणि, शिक्षणकौशलानि इत्यादीनि अन्तर्भवन्ति । अत्र बह्व्यः शिक्षणपद्धतयः दृश्यन्ते ।

- सूत्रपद्धतिः
- प्रत्यक्षपद्धतिः
- प्रश्नोत्तरपद्धतिः
- व्याख्यापद्धतिः
- शास्त्रार्थपद्धतिः/वादविवादपद्धतिः

- प्रयोगपूर्वकाधिगमपद्धतिः
- कथाकथनप्रविधिः/ आख्यायिकाप्रकारः
- अन्वेषणविधिः

एवम् विभिन्नविधिभिरधिगम आसीत् प्राचीनकाले । तेषां विधीनां विवरणमेवं भवति,

***सूत्रपद्धतिः***

सङ्क्षेपेण अथवा अल्पाक्षरैर्यदुच्यते सा पद्धतिः सूत्रपद्धतिः । अत्र सूत्ररूपेण विचारबोधनं विद्यते । यथा– (छान्दोग्योपनिषदि, मूलमन्विच्छ सन् १९९१, ६, ८, ४) अत्र श्वेतकेतुः पितरम् आरूणिं शरीरस्य क्व मूलम् इति पृच्छति । तदा पुत्र एवं सूत्ररूपेण अवदत् । तथैव माण्डूक्योपनिषदि एवमस्ति । यथा– नान्तः प्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानधनं न प्रज्ञं नाप्रज्ञम् । अत्र आत्मा ज्ञातव्यः इति आचार्यस्य बोधनं वर्तते।

***अन्वेषणविधिः***

प्राचीनकालस्य शिक्षणस्य अधिगमेषु अन्यतमोः विधिरयम् । अत्र मनुष्यः स्वप्रयासेन ज्ञानं प्राप्तुं शक्नोति । अन्येन प्रदत्तं ज्ञानं शाब्दिकरूपेण ग्रहीतुं शक्नोति, परन्तु तत् आत्मसात्कर्तुं शक्यात् । अध्यापकः छात्राणां मार्गदर्शनं कर्तुं शक्नोति, परन्तु ज्ञानस्य आत्मीकरणं छात्रेण स्वयं करणीयं भवति । एवम् जिज्ञासुः एव अन्वेषणद्वारा ज्ञानं प्राप्नुयात् शिक्षकस्य मार्गदर्शनेन इति ।

***प्रयोगप्रणाली :***

अत्र छात्रेण ये विषयाः प्रयोगपूर्वकेण ज्ञायन्ते तान् तथैव ज्ञायते । आहत्य पुस्तकाधिगमस्य अपेक्षया प्रयोगपूर्वकाधिगमः सरलः रोचकश्च भवति । गुरूः यदा छात्रं प्रयोगपूर्वकम् अधिगन्तुं प्रेरयति तदा छात्रः संपूर्णतया स्वयं निमजो भूत्वा गूढतत्त्वान्यपि सप्रयोगमधिगच्छति । भगवतः सर्वव्यापकत्त्वं दर्शयितुं गुरुः नीरप्रलीनलवणप्रयोगम् अध्यापयति । एतत् छान्दोग्योपनिषदि दृश्यते, यत् आरूणिः पुत्रं बोधयति । लवणमेतदुदकेऽवाधायाथ मा प्रातरूपसीदथा इति । स ह तथा चकार । स होवाच यद्दोषा लवणमुदकेऽवाधा अङ्गतदाहरेति । तद्धावमृश्यन विवेद । यथा विलीनमेवाङ्स्यान्तादाचामेति, कथमिति । लवणमिति मध्यादाचामेति, कथमिति। लवणमिति । अन्तादाचामेति, कथमिति ।

लवणमिति । अभिप्रास्यैतत् अथ मोपसीदथा इति । तद्ध तथा चकार । तच्छश्वत् संवर्तते । इति । एवमेव अग्रे अन्यान्यप्रयोगैः दर्शयति गुरुः । विषयाणां बोधनक्रमः प्रयोयप्रणालीद्वारा भवति स्म ।

***प्रत्यक्षपद्धतिः***

शिक्षणपद्धतीषु इयं पद्धतिः बहु प्रभावशाली मनोवैज्ञानिकी, विशिष्टपद्धतिः च वर्तते । अत्र प्रत्यक्षप्रदर्शनं प्रयोगपुरस्सरं च बोध्यते आचार्येण (छान्दोग्योपनिषदि, सन् १९९१, ६,१२,१) । प्रत्यक्षपद्धतेः विचारः एवमस्ति – न्यग्रोधफलमाहरेतीदं भगव इति । भिन्धीति । भिन्ना भगव इति । किमत्तपश्यसीति ? इत्यण्व इयेमा धाना इति । आसाम् अङ्गैकां भिन्धीति । भिन्ना भगव इति । न किञ्चन भगव इति । किमत्र पश्यसीति । न किञ्चन भगव इति । अत्र उच्यन्ते यत् स्थूलात् सूक्ष्मं प्रति, सरलात् कठिनं प्रति, ज्ञातात् अज्ञातं प्रति इत्यादीनि शिक्षासूत्राणि ।

***प्रश्नोत्तरपद्धतिः***

उपनिषत्सु इयं पद्धतिः बहुत्रानुसृता । प्रश्नोपनिषत् प्रश्नोत्तरपद्धत्या एवारभ्यते । सूक्ष्मतत्त्वस्य शिक्षणमनेन क्रमेण दीयते । महर्षिं पिप्पलादं केचन जिज्ञासवः उपसर्पन्ति । तान् उद्दिश्य पिप्पलादेनोक्तम् – तान् ह स ऋषिरूवाच । भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ, यथाकामं प्रश्नान् पृच्छत, यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति । तेषु अन्यतमः कबन्धी कात्यायन उपेत्य अपृच्छत्, भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्त इति । तस्मै स होवाच प्रजाकामो वै प्रजापतिः स तपोऽतप्यत, स तपस्तप्त्वा स मिथुनमुत्पादयते रयिं च प्राणं चेति, एतौ मे बहुधा प्रजाः करिष्यत इति । अत्र प्रजापतिः इत्युक्ते, परब्रह्मणः सगुणरूपः इति ।

***वादविवादपद्धतिः***

वादे वादे जायते तत्वबोधः इति यत् वचन ंश्रूयते तत् तत्वनिर्णयाय संवादः, वादः, वादविवादः, शास्त्रार्थः, अपेक्षितः । केनापि किमपि कथितमिति तदेवं प्रमाणं नानुमन्यते । तदर्थं हेतुप्रदानपुरस्सरं प्रमाणमावश्यकम् । इयं पद्धतिरेव शास्त्रार्थपद्धतिः अथवा वादविवादपद्धतिः इति । यथा – जनकस्य सभायां याज्ञवल्क्य उषस्तिचाक्रायणयोः शास्त्रार्थोः दृश्यते । अथ हैनमुषस्विश्वाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षं ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्व इति (बृहदारयोपनिषदि, सन् १९९१, ३,४,१ ) ।

***व्याख्यापद्धतिः***

विषयस्य विस्तरशः स्पष्टीकरणम् अनया पद्धत्या क्रियते । (छान्दोग्योपनिषदि, सन् १९९१, १,१,२) अस्ति– ओमित्येतदक्षरमुद्गीथमुपासीत । ओमिति ह्युद्गायति तस्योपाख्यानम् । अत्र उपव्याख्यानं पदेनैव ज्ञायते । एषां भूतानां पृथिवी रसः पृथिव्या आपो रसः । अपामोषधयो रस ओषधीनां पुरूषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः सामन उद्गीथो रसः ।

***कथाकथनविधिः/ आख्यायिकाप्रकारः***

उपनिषत्सु कथारूपेण विचारः आरभ्यते । यथा कठोपनिषदि आरम्भे दृश्यते यत् वाजश्रवसनचि-केतसोः उपाख्यानम् । तथैव केनोपनिषदि उमेन्द्रयोः कथा (२.३) । छान्दोग्योपनिषदि प्राणमहत्ववर्णनपरा रूचिरा काचित् कथा दृश्यते । अत्र तु यो ह वै ज्येष्ठं श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च इति । कलहायमानानि इन्द्रियाणि न्यायनिर्णयार्थं प्रजापतेः समीपं गतानि । तेषां कलहकारणम् आकर्ण्य सः एवम् अवोचत् । यस्यानुपस्थितौ देहः सर्वथा कुरूपी सञ्जायते तदिन्द्रियमेव सर्वश्रेष्ठम् इति आह । तदा क्रमशः एकैकमिन्द्रियमपि देहं त्यक्त्वा किञ्चत्कालानन्तरं पुनः देहं प्रविश्य स्व – स्व अनुपस्थितौ देहस्य स्थितिम् अजानम् । अन्ते प्रत्येकं इन्द्रियोऽपि प्राणा नित्यम् इति प्राशंसन् । एवम् कथाकथनद्वारा अपि अधिगमः भवति स्म प्राचीनकाले । तैत्तरीयोपनिषदि तपसः द्वारा भृगु पञ्चकोशान् अभिजानाति । अस्याम् उपनिषदौ अन्नमयकोशस्य प्राणमयकोशस्य मनोमयकोशस्य विज्ञानमयकोशस्य आन्नदमयकोशस्य च विचारः वर्तते, (तत्रैव सन् १९९१, ३,२,६) अन्ते भृगुः तपसा आनन्दो ब्रह्मेति जानाति । आनन्दमयब्रह्मणः साक्षात्कारं प्राप्नोति। एषा पञ्चकोशविद्या इति कथ्यते । जीवने स्वाध्यायं प्रवचनं च न त्यक्तव्यम् इति तैत्तरीयोपनिषदि अधिगमस्य विचारो दृश्यते । आचार्येण छात्राः उपदिष्टाः भवन्ति । तत् तु एवमस्ति – ऋतं च स्वाध्याय–प्रवचने च । सत्यं च स्वाध्याय प्रवचने च । इति सत्ये निष्ठः राथीतरः, अपि च स्वाध्यायप्रवचनयोः अनुष्ठानकर्ता

मौद्गल्यस्य अभिप्रायः । प्राचीनकालस्य शिक्षणे श्रद्धा बहु प्रमुखा आसीत् । श्रद्धया सर्वं ज्ञातुं शक्यते इति कठोपनिषदि नचिकेतसः उदाहरणं दृश्यते ।

***शिक्षणं तस्योद्देश्यञ्च***

शिक्ष् विद्योपादान इति पाणिनीयधातुना शिक्षणशब्दो निष्पद्यते तस्यार्थस्तु सामीप्येन विद्यायाः प्राप्तिः । तस्यार्थः उपदेशः । शिक्षणम् । अस्मादेव धातोर्भावे ल्युटि शिक्षणशब्दः सिद्धः । विद्यादानं, बोधनम् कथनम् इत्यर्थान् गमयति । कस्मात् ? गुरोः एकाशात् विद्यायाः सम्प्राप्तिप्रक्रिया भाव वर्तते तस्या नाम शिक्षणमिति । एषा प्रक्रिया कथं भवेत् ? आचार्यैः शिष्येभ्यो विद्यादाने के के विधय अवलम्बनीयाः, तेषु विधिषु व्याकरणशास्त्रस्य दर्शनादिशिक्षणे कथं सारल्यं स्यात् ? अल्पीयसा कालेन परीक्षाऽभिमुखानां छात्राणां व्याकरणादिशास्त्राणां ज्ञानञ्च कथं भवेदिती विचारकरंणीयः । शिक्षणे तु विद्याया आदानप्रदानं भवति तत्र भाषाया मुख्यं स्थानं भवति अत एव प्रधानभूताया भाषाया एव विषये तैत्तिरीयोपनिषदि वल्लीत्रये प्रथमवल्ली शिक्षावल्ली वर्तते । तस्यारम्भे उच्यते । यस्य भाषाज्ञानं सम्यक् अस्ति स विद्यामपि सम्यक् प्राप्तुं शक्नोति । तस्मात् वर्णोच्चारणक्रम एव आरम्भे निरूपयते । यच्च ज्ञानमस्माभिः प्राप्तुं शक्यते । तस्मात् वर्णोच्चारणक्रमः एव आरम्भे निरूपयते । यच्च ज्ञानमस्माभिः प्राप्यते तस्य ६० प्रतिशतश्रवणेनैव भवन्ति शिक्षणतज्ज्ञा अभिप्रायन्ति। अतः यस्य कस्यापि विषयस्य शिक्षणे भाषा शुद्धा सरला च भवेत् । तदर्थं तत् सूचयितुमेवोक्तमादौ वर्णस्वरः। मात्राबलम् । सामसन्तानः । इति ।

सम्यक् शिक्षणे आचार्यस्य प्रधानं स्थानम् । यथा आचार्या भवन्ति तथैव छात्रा अपि बर्धिता भवन्ति। तस्मादाचार्याः स्वविद्यया व्यवहारेण च विद्यार्थिनः शिक्षयेयु । तदा एव छात्राः विद्याविनयसम्पन्ना व्यवहार कुशलाश्च भवन्ति । आचार्यस्य लक्षणं स्पष्टमुच्यते – यत्र च ओङ्कारोपासनं निरूपयते तत्र आचार्यस्य प्रार्थना वर्तते । आचार्यः प्रार्थयति यत् – सोमेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमाम् । कर्णाभ्यां भूरि विश्रुवम् परमेश्वर मां मेधाशक्त्या बलयतु प्रीण्यतु । अहं ब्रह्मज्ञानस्य धारयिता भवेयम् । शरीरं मम योग्यं भवेत् । जिह्वा मम मधुरभाषिणी भवेत् । अहं श्रोत्राभ्या. बहुश्रोता भवेयम् ।

इत्यादिना एक आचार्यः कथं भवेदिति ज्ञायते । स ज्ञानी भवेत् । अहं ज्ञानी अस्मि । इति अहङ्कारो न कुर्यात् । यदि पुनरपि यत्किञ्चिद ज्ञेयमस्ति तर्हि तज्ज्ञानार्थं स सविनयं प्रयतेत । तदा एव आचार्य. आचार्यत्वमाप्नोति । अपि च आचार्या मृदुभाषी भवेत् तदा एव अन्तेवासिनः आचार्यस्य समीपमुपसर्पयन्ति ।

एतदपेक्षया अपि बहुप्रमुखं कर्तव्यमाचार्यस्य विद्यते यत् विद्यार्थिनां व्यवहारेण गुणादानं दोषनिवारणं च । अत अत्र तु आचार्यः स्वव्यवहारेणैव तत् कर्तुं शक्नोति न विधिबोधनमात्रेण । अत एवोक्तम्–

आचिनोति च यच्छास्त्रमाचारे स्थपायत्यपि ।
स्वयमाचरते श्रेष्ठः तस्मादाचार्य उच्वते ॥
उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः ।
सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते ॥ (मनुः, सन् २००३, पृ. ३३)

यः यं व्यवहारं शास्त्रोक्तमन्येभ्यो वदति तं व्यवहारं स्वजीवने आचरेत् तदा एव स आचार्यो भवति । एतदर्थमाचार्यो मुक्तमनस्को भवेत् । छात्रेभ्यो यदुपदिशति तत् स्वयमाचरेत् । नास्ति चेत् छात्रा तं निश्चये

न तिरस्कुर्वन्ति । एष एव अंशः ‘सूचित अस्ति आचार्योपदेशभागे यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नेतराणि । यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि । नो इतराणि । अस्माकमाचार्याणां ये च सदाचाराः सन्ति ते त्वयाऽनुसर्तव्याः । अस्माभिः ये च दुराचारा अनुष्ठिताः ते च नानुसर्तव्याः । इति आचार्यो वदति । अनेन ज्ञायते यत् आचार्यो व्यवहारकुशलो भवेत् अनुतिष्ठेत च । अपि च स विनम्रो भवेत् । मयापि दोषा अनुक्रीयन्ते । तस्मात् तान् नानुतिष्ठ इति वक्तुं एष विनम्रभावः । यदि आचार्यो नास्ति तर्हि स आचार्यो न भवति इति उपनिषत् सन्दिशति । एवञ्च सत्सम्प्रदायनिष्ठादिगुणयुक्तान् सदाचार्यान् जिज्ञासुः शिष्यो वृणुयात् । यथा – शिक्षणस्य स्वरूपमुद्देश्यञ्च देहमेव आत्मत्वेन

“सिद्धं सत्सम्प्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं सत्वस्थं सत्यवाचं समनियतया साधुवृत्या समेतम् ।
दम्भाऽसूयादिमुक्त जितविषयगणं दीर्घबन्धुं दयालुं स्खालित्ये शासितारं परहितपरकं देशिकं भूष्णुरिप्सेत्।।

अज्ञानेन संसारे दुःखमनुभवति । तस्मात् स उत्थाय देहातिरिक्तस्य आत्मनः स्वस्वरूपज्ञानमेवोद्देश्यम्। उक्तोपनिषदाधारेण व्यक्तौ विवेकोत्पत्तिः शिक्षणस्य उद्देश्येषु अन्यतमा सन्ति ।

***आधुनिकशिक्षणविधिव्यवस्थाया विचारः***

पूर्वोक्तेषु प्राचीनशिक्षणविधिषु शिक्षाया लक्ष्यप्राप्तिरासीत् । परमपरमप्रयोजनं वर्तमानसमये सञ्चाल्यमाना शिक्षाया ये विधय या व्यवस्था वर्तते सा कथमस्ति चेच्छृणु-

कश्चन लघुः परिवारः माता पिता षड्वर्षीयः पुत्रश्च अथ कदाचित् पिता पुत्रेण सह सायङ्काले वायुविहारार्थं गतः मार्गे महती वृष्टिरारब्धा अतः तौ उभावपि पार्श्वे विद्यमानस्य वटवृक्षस्य अधस्तात् आश्रयं प्राप्तवन्तौ । समयस्य सदुपयोगार्थं दिशां विषये पिता पुत्रस्य बोधनमारब्धवान् पुत्रेण सपदि सर्वमवगतम् । एतावता वृष्टिरपि विरता । तौ च गृहं प्रत्यागतवन्तौ । पिता सम्भ्रमेणैव पुत्रस्य शिक्षणविषये भार्यामुक्तवान् । कुतूहलेन सा माता पृष्टवति तात ! पूर्वा दिक् का ? दर्शय अनुक्षणं पुत्रेणोक्तं वटवृक्षस्य समीपं याम एतादृशी आधुनिक– शिक्षणविधिव्यवस्था च व्यांप्ता वर्तते । अयं कश्चन दृष्टान्त आधुनिकशिक्षाया दिशां दर्शयति एतावता शिक्षायां आत्मनिर्भरता स्यात्, शिक्षणविधिषु सारल्यं स्यात् शिक्षकेषु आचार्यत्वं स्यात् तदनन्तरमेव व्याकरणदर्शनादिशास्त्रशिक्षणे आगमनात्मको निगमनात्मको व्याख्यानात्मको विश्लेषणात्मको वादविवादात्मकः प्रवचनात्मकादयः ये केऽप्याधुनिका विधयः सन्ति तेषु –शिक्षणे आगमनात्मको विश्लेषणात्मको व्याख्यानात्मकश्च छात्रछात्रानुरूपमुपयोगिनः सफलाश्च भविष्यन्ति, न हि नाममात्रं मनोविनोदाय कपोलकल्पिता परनिर्भराः, गर्दभस्य भारवहनमिव श्रान्तिरेव व्याप्ता ।

**उपसंहृतिः**

एवम् प्राचीनशिक्षणपद्धतौ सर्वविधाधिगमप्रकाराः आसन् । अत्र अधिगन्तृन् उद्दिश्य अधिगमः आसीत् । अतः आचार्यो विविधदृष्टान्तद्वारा बोधयति स्म । पूर्वं भिन्नभिन्नप्रकारेण कौशलवर्धनार्थं, ज्ञानवर्धनार्थं, व्यवहारार्थं या विद्या अपेक्षिता अवर्तत, तस्या विद्याया, अधिगमार्थं विविधोपायान् कुर्वन्तः आसन् इति एतैः उदाहरणैः ज्ञायते। एतादृशविचाराः शिक्षणस्य प्राचीनाधिगमपद्धतौ आसन् इति एतेन ज्ञायते । केषाञ्चनविचारणां मण्डनं कृतम् । कानिचन स्वीकृतानि । यानि वर्तमानानि विधिरूपेण गर्दभभारवत् सर्वकारेण स्वीकृतानि सर्वाण्यपि उच्चशिक्षायां माध्यमिकशिक्षायां प्राथमिकशिक्षायाञ्च अध्यापकानां स्वार्थसाधका घटाटोपपरकाः विपरीतदिशा निर्देशकाः सन्ति । शिक्षका आचार्यगुणरहिता जीवनवृत्तौ धनार्जनम्पदोन्नतिमात्रञ्च प्रवाहरूपेण

वर्धमाना दृश्यन्ते । कुशलाध्यापक आचार्यो भूत्वा स्वाचाराचरणे न समयसापेक्षाध्यापनेन सुसभ्यसमाजनिर्माणापेक्षका आधुनिकशिक्षणपद्धतौ अधस्तना दोषा वर्धमानाः सन्ति । तद्यथा –

१. व्यक्तित्वविकासाय अपेक्षिताः उत्तमाः संस्कारा न प्राप्यन्ते ।

२. प्राचीनार्षपरम्पराया योगदानमुदाहृत्य न तावदुच्यते येन छात्रस्यापि मनसि निर्लक्ष्यभावः, अनास्था च भवति । अनेन कारणेन छात्रा अनभिज्ञा स्वीयपरम्पराविषये अभिमानं गर्वं च न वहेयुः । अस्योदाहरणं साम्प्रतं प्रसिद्धं योगः पाश्चात्यैः सर्वथा प्रयोगेण मतान्तरमेव तद्विषये आस्था प्रवृद्धा । एतादृशानि दर्शनानि अन्यानि जीवनोपयुक्तानि एकादश अवशिष्टानि सन्ति तदर्थं पाश्चात्यानां मुखदर्शका वयम् । इदानीन्तनां शिक्षकानां छात्राणाञ्च उद्देश्यं कीदृशं दृश्यते ।

३. शिक्षणं धनकेन्द्रितं सम्पन्नम् ।

४. शिक्षणं पदकेन्द्रितं सम्पन्नम् ।

५. शिक्षणं स्वराजनेतृणां मनोविनोदपरकम् ।

६. कौशलस्य न तावान् अवसरः, गभीराणां विपरीतोद्देश्यपरिपूरकाणां पाठ्यपुस्तकानां वहनमात्रम्।

७. पठनपाठनविषये परिचर्चा वैदेशिकानुदानभिक्षार्थम् ।

८. परनिर्भरतोत्पादनपरकम् ।

९. स्वराष्ट्रियौदासीन्यजनकम् ।

अतः सम्प्रति शिक्षाक्षेत्रेषु दृश्यमाना विकीर्णा विधयो व्यवस्था पाठ्यांशाश्च आमूलपरिवर्तनेन विना शिक्षाया लक्ष्यं फलोपधायकत्वं नूतनत्वं च न दृश्यते ।

**सन्दर्भग्रन्थाः**

अधिकारी, हेमाङ्गराजः (२०६९), *नेपालीभाषा शिक्षण,* विद्यार्थी पुस्तक भण्डार ।

*ईशाद्यष्टोत्तरशतोपनिषदः* (सन् १९९१), चौखम्बा विद्याभवन ।

बी.जी. भाग्यलक्ष्मी (२०७६), प्राचीनाधिगमपद्धतिः, *गुरुकुलसन्देशः*, ८, (७),११४-११६ ।

दीक्षितः भट्टोजी (२०४०),*वैयाकरणसिद्धान्तकौमुदी,* सतत्वबोधिनी प्रथमंसंस्करणम्, मुम्बई, खेमराज श्रीवेकंटेश्वर स्टीमप्रेस ।

पतञ्जलिः (सन् १९८७), *व्याकरणमहाभाष्यम्,* चौखम्बा – संस्कृत – प्रतिष्ठानम् ।

पाठकः रङ्गनाथः (२०२४), *स्फोटदर्शनम्,* विहारराष्ट्रभाषा – परिषद् ।

पाण्डेयः, रामाज्ञा (२०३९), *व्याकरणदर्शनभूमिका,* द्वितीयं संस्करणम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

बी.जी. भाग्यलक्ष्मीः (२०७९), *श्रुतिशोभा* जनसेवापरिसरः, चन्नेनहल्लि ग्रामः, वेदविज्ञान गुरुकुलस्य अर्ध-मण्डलोत्सन ।

मनुः (सन् २००३), *मनुस्मृतिः,* राष्ट्रिय संस्कृत संस्थानम् ।

रेग्मी, भोलानारायणः (२०६२), व्याकरणदर्शने बौद्धार्थवाच्यत्वप्रकाशनम्, *ऋतम्भरा,* ८, (११) १११ ।